॥श्रीकृष्णायनमः॥वंदे श्रीवल्लभाचार्यान्पुष्टिमार्गप्रवर्तकान्॥यत्कृपालेशमात्रेणकृतार्थाःस्युःकलौनराः॥१॥माया
वादमहान्धकारदलनःसद्भक्तिसंस्थापकः श्रीकृष्णास्यमुखेन्दुरेवजगति श्रीवल्लभाख्योभवत्॥जीवोद्धारकृतेजग
द्गुरुतरस्सेव्योऽखिलैर्वैष्णवैर्ध्यायेलक्ष्मणदीक्षितस्यतनयंगोपेशपुत्रप्रियम्॥२॥जीवानांकृपयाकर्मप्रकृतिगुणवृ
तस्वात्मनांमंगलायसंसारांधंतमोऽस्यन्निजपदभजनस्येक्षणंसंददन्यः॥स्वामिगोभिःपरेशोव्रजजनसुखदोव
ल्लभस्यालयेभूद्वंदेतंविठ्ठलेशांजनशरणपदंसर्वकामप्रपूरम्॥३॥येनेतिनेतिगदतिश्रुतिरात्ममूलंयत्पादकल्पतरु
मेवशिवाजमुख्याः॥ध्यात्वाभवन्सकलकारणकारणंतंभक्त्यैकगम्यमभवंयदुनाथमीडे॥४॥श्रीकृष्णंराधिकाका
न्तंमेघश्यामंमनोहरम्॥वंदेपीतांबरंपद्मलोचनंनंदनंदनं॥५॥श्रीराधांकृष्णचंद्रस्यप्रियांविद्युन्निभांरमाम्॥धात्री
रमाशिवादीनांकारणंपरमांभजे॥६॥वंदेकृष्णंसच्चिदानन्दगात्रंराधाकांतंराधिकायांरतंवै॥बर्हापीडंवेणुनादेन
गोभिर्गोपैःसाकंमोदयन्तंव्रजेमाम्॥७॥निष्यानीयसुतधनसुहृद्देहगेहकुटुंबसंप्राप्यैकोन्तरनखमितंदुःख
जालंस्मयद्रोः॥ज्ञात्वाचार्यैर्मधुरमुरलीनादयुक्तेःपवीदेश्रीकृष्णाख्येभजनसरसींपूर्य्यमानांप्रतस्थे॥८॥
कृष्णेन्दुलीलाकिरणाननादिसंसारघोरांधतमोरिपून्वे॥आत्मार्णवोल्लासकरान्नमामिसुखप्रदान्भक्तचको
रपेयान्॥अन्योन्यभाग्यैर्यौभेजेकृष्णयोःश्रीशयोरहम्॥वक्ष्येगांधर्व्यमुद्वाहंरुक्मिणीमंगलाह्वयम्॥१०॥
मायागुणारूढमदधीकाहंकृष्णस्यपरात्परस्यवै॥भैष्म्याश्चपाणिग्रहणानुवर्णनंमायांगुणातीततरांह्यलौकि

यद्यप्यहंमन्दमतिस्तथापिभक्त्याकृतंरमाकृष्णविवाहवर्णनम्॥भविष्यतीशांघ्रिसरोजतत्त्वंययोर्वेदविदोपिना
विदन्॥सदिसविनांसतांसुदंभंडवरोक्तिवद्धवम्॥१२॥भूमौयद्यपिदुर्जनायमसमाप्तिष्टन्तिदोषेक्षणाःकुर्वंत्य
१ पिनिजात्मदेववचमागःकृष्णापयामेउनम्॥सर्वार्थसिद्धिकंस्तदुरितारिंकृष्णभक्तिप्रदंसमरंजूकन्येशायुताःस्त्यजंति
किमहोदेहनराःस्पष्टं॥१३॥मंदःकवीनांहरिलेविनायज्ञःप्रार्थीगिमिथ्यामुपहास्यतामहम्॥उदग्ररम्यीहफलवि
मोहतःखर्वयियथोद्बाहुरलोसमीहया॥१३॥मूकंकरोत्याशुकविंयथाध्रुवंपंगुंगिरिंलंघयतेरुणंयथात्॥यस्य
कृपातंव्रजराजनन्दनंवंदेसदानन्दतनुंरमापतिम्॥१४॥महाब्धिपालोप्यमृतायसानेःपातोपिसुभ्रातृकराभवे
भ्रूणाम्॥भ्रमात्रघातोणिसुखायतेयतानुकंपघातंप्रणमाम्यहंहरिम्॥१४॥तद्वाचामुपयोगपवजनतापापाप
हायत्रवैश्लोकेश्लोकमबद्धवत्यपिहरेःकृष्णस्यसच्चितनोः॥कीर्त्यैकान्यभिधेयकानिसुधियःशृण्वंतिगायंति
तन्नित्यंमोदयुतावदंत्यहमतःप्रोत्साहितस्तद्ब्रुवे॥१५॥राजासीद्भीष्मनामाखिलरिपुभयदःकुंडिनेशोविदर्भे १
देशेवीरोमहात्माधनदजलपतीन्द्रादिभिर्लोकपालैः॥तुल्यैश्वर्यःप्रजानांविधुरिवसुखदःसर्वशास्त्रार्थवेत्ता
ब्रह्मण्यःपुण्यशीलोनिखिलनिगमगःकृष्णसेवानुरक्तः॥१६॥रुक्मीधारोनुजोरुक्मरथइतिततोरुक्मबा
हुश्चरुक्मकेशोयोरुक्ममालाविषयविषरताःपंचपुत्रास्तुतस्य॥आसन्कृष्णारयोवैहृदयदमरतस्येन्द्रियाणि
वदुष्टास्तेषामासीच्छसांत्याहरिहृदयगृहारुक्मिणीश्रीरिवाध्येः॥१७॥दृष्ट्वापुत्रींमुखजितविधुंकंजनेत्रांप्र

नोज्ञांसास्साल्लक्ष्मींमृदुतरतनुंभीष्मकोचिंतयद्वै ॥कन्येषाभखिलगुणवतीदोषहीनासुलक्ष्माकस्मैदेयेतिचहृदि मनसि
यदानारदतद्ददर्श ॥१८॥दृष्ट्वैवतंवेदविदांवरिष्टंमुनिंमहाभागवतंनृपेंद्रः ॥उत्थायपादौशिरसाप्रणम्यनिवेशयित्वाक
न्यसासनाग्र्य ॥१९॥प्रक्षाल्यपादौतद्यःसभार्याबिराजावहन्मूर्द्धनिगंधमाल्यैः ॥प्रसाधनीराजनतश्चदिव्यैर्हत्वातमर्बर्स
सुतंसुतर्प्य ॥१९॥एवंसमभ्यर्च्यपदौस्पृशन्मुनिंमुवाचभीष्मोभगवन्जनैःफलं ॥लब्धंमयादर्शनतस्तवप्रभोकरो
मिकिंस्वात्मरतस्यदीदीनधीः ॥२०॥ततःप्रसन्नोमुनिराशिषोददौशत्रुक्षयोराज्यसमृद्धितास्तुते ॥गोविप्रनारायण
पादसेवनेबुद्धिर्दृढाभीष्मनृपेंद्रसद्यशः ॥२२॥दत्वाशिषस्तंसमुवाचनारदोराजन्समास्तुत्यतवात्मजामिह ॥समा
गताहंत्वबलोकनायतांसंदर्शयेहोममपुरयातुलाम् ॥२३॥इत्थंसमाश्रुत्यमुनेर्वचोनृपउवाचपत्नींसनयांसमान
य ॥श्रुत्वाविदर्भेशवचोगृहांतरंजगामराज्ञीदुहितुःसमीपके ॥२४॥उवाचमातामुनयेप्रणामंकुर्वाद्रालुत्रिप
दारविन्यम् ॥स्पृष्ट्वास्वमूर्द्धाजिगदुत्तरंनेपतिंप्रदास्यसतुलंमुनींद्राः ॥२५॥साकृष्णपादांबुजलीनमानसहंसाविंद
र्भेशसुताज्ञयाप्रसा ॥धात्र्यासमंवंदितुमाययौमुनेःपादारविन्दंयदुनाथकाम्यया ॥२६॥नतोमुनेःसासमुपस
रुक्मिणीननामपादौकमलेवभार्गवम् ॥मुनिस्तुतामात्मसमानरूपिणींदृष्ट्वैवलीनष्टसुखवारिधावभूत् ॥२७॥
प्रेमाश्रुमंचन्पुलकावृतांगोद्रवन्मनागद्गदवाकविवर्णः ॥नैवाशकद्भीष्मसुतांसुरर्षिःसमीक्षितुंप्रेमसमुद्रमग्नश्च
॥२८॥ इतिश्रीद्राविडकान्हजीभट्टात्मजबालमुकुंदभट्टविरचितेरुक्मिणीमंगलाकाव्येप्रथमःसर्गः ॥१॥धैर्य्यं

समालंब्य त तस्तु नारदो विदर्भराजेन्द्रसुतां विलोक्यसः॥ विभ्राजयंतीं ककुभःस्व इ॥भया मादाकुलातकयदा
ऽऽस्मे देवताम्॥१॥शचीश्वरीन्हीरतिवाच्यरूंधतीइंकुसलाघाःप्रतिमानवास्याः॥अलौकिकामेनुविभातिभीष्मजारमा
२ पराविर्यदुनाथशर्मणि॥२॥इत्थं विचिंत्याऽऽह मुनिस्तु रुक्मिणीं संस्तृणतोराजवरस्यसादरः॥कृष्णःपतिस्तास्तिसुते
सम्ःपरब्रह्माऽद्वयानन्तपरात्मयाद्भुतः॥३॥साक्षित्परानन्दतनुर्हदीघ्घरोनानावतारस्यनिदानमव्ययं॥वेदैःसमस्तो
निश्चय आत्मनामात्मास्वलेज्ञाःप्रकृतेःपरात्परं॥४॥गोपोव्रजे क्रीडतियोनित्रांसखीगोपैश्चगोभिर्व्रजराजनन्दनः॥म
नुष्यलीलो मथुरापुरेसदाश्रीद्वारिकायांन्टपलीलयानिजेः॥५॥भाद्रासिताष्टम्यजभेन्दजेदिनेत्रानीलुसुतोऽझगेवृषे
॥लग्नेतुलाहृयलिगेफ्टगूष्णभराहीगुरौलाभगतेद्धरात्रके॥६॥कारागृहेयोवसुदेवपत्न्यांजातोरित्रारेवजगदाप्यवा
दुः॥पीतांबरादिव्यकिरीटमालावतंसकांच्यंगदनूपुराव्यः॥७॥ततोनित्रीथेरिपुराजतोभरंभीतेननीतोजन
केनगोकुलम्॥तत्रांबसनन्द्रीव्रजराजमंदिरेलीलांखकीयांप्रकटीचकारयः॥८॥कंसेरितांतत्रवकीजिघांसयास २
मागताहालहालाविलस्तना॥वरांगनांकेविनिधायतंशिशुंदत्वास्तनंमुक्तिमवापदुर्लभाम्॥९॥ प्रेंखस्थितेगो
पकुमारकैर्वृतःपदाञ्चघाताच्छकटंन्ययातयत्॥नन्दांगणबालविनोदमाचरन्तृणावर्त्तमिरिंजघानखे॥
१०॥तस्येकदालालयतीमुखंप्रस्फलेकान्समस्तान्ददृशेविभ्रभतः॥निमील्यनेत्रेमृगलोचनात्मजंकृष्णंहृदालिं
ग्यतदासविस्मिता॥११॥मधुपुर्यांवासुदेवोनत्वार्थयदादरान्मुनिंप्रेम्णा॥कुरुसुतयोःसंस्कारंगत्वानन्दव्रजं

भगवन्॥१२॥इत्थंपुरोधावसुदेवनोदितोद्विजातिसंस्कारविधिंबलेशयोः॥कर्तुंब्रजेसायमुपागतोधितोगर्गोब्रजे
शेनतदर्थमर्थितः॥१३॥दृष्ट्वाथनंदपत्न्याश्चपलतरशिशुंचंचलावर्णशुभ्राभासंजीमूतकृष्णंमुनिरथपुल
कस्वेदकंपावृतांगः॥मुंचन्नेत्राम्बुधारांसुशिथिलहृदयःस्तब्धवाक्भिन्नवर्णोब्रह्मानन्देन्यमज्जत्सरिदिवजलधौ
नामरूपेविहाय॥१४॥सूर्यानन्तप्रकाशोविधुशतसुभगःकोटिकामप्रकामःसान्द्रानन्दामृताब्धीरुचिरघनतनुर्मेहिशास्त
स्यहन्त॥कान्तेकस्मादुपेतोब्रजभुविहृदयंकृष्णमालोक्यगर्गोवाणीमुक्तेतिलीनःपुनरमृतनिधौहृद्भवोगोचरेसः॥१५
॥धैर्यंधृत्वासबोधोब्रजपतितनयंनैकधातर्कयन्नतुकिंसद्भाग्यामरद्रोर्वननवकुसुमंकिंदृगंतर्भपुंजः॥सद्दसाचिंकि
मकाबहुसमयकृताहंमतेर्नाशकर्त्रीतित्वंवेदान्तवेद्यंकिमथनुकृतांप्रेमजन्मावनीयम्॥१६॥नन्देनोक्तोद्विजत्वंकुरु त ७
ममसुतयोर्नामियुक्तंद्विजातिसंस्कारंगुप्तमेवाहमितितंदनयोःकर्तुमासोग्रहेन्तः॥दृष्ट्वैवौतौकुमारौपरमसुखनिधी
गौरकृष्णौविहीनोहंजातोनामरूपात्किमर्थैःप्रकथयाम्यघनन्दयशोधाम॥१७॥मायातीताकृकर्माकृतिगुणवसतेः
सच्चिदानन्दमूर्त्तेर्नाहंनामास्यज्ञातुंप्रकृतिगुणमतिरस्तुसुतस्यक्षमोज्ञः॥इत्थंब्रूयांतदेमोरिपुभयचकितंमांवदिष्यं
तिगोपाःसाक्षद्ब्रह्मोपतितत्वाप्रणतिमकरवंचेन्महोन्तमेव॥१८॥यद्भासाभातिसूर्यानलविधुसहितंविश्वमंतर्बहिर्यत्पादौ
ध्यात्वामनोजंविधिशिवपुरुहूताद्यमीयुःसकामाः॥निष्कामाःप्रेमभक्तिंजयजयवचनैर्वेदमूर्द्धाचितौधिर्यःसोयंन
न्दसूनुर्ममकथमभवनेत्रयोर्गोचरोहो॥१९॥यस्माद्देषःपरस्याःप्रकृतिपरतरोवेदगुरुःसरामःस्वीयामाश्चर्यली

लोके अपि तिर्भुवने दर्शयन्नन्दपुत्रः॥ आत्मीयानां सुखाय क्षितिभरदनुजान्नाशयन्कालशास्त्यात्तस्मात्कृष्णस्य संवृत्तिः
निगदितमहं कर्म कुर्यां यथावत्॥२०॥ एवं विचार्य स ऋषिरीशयो रामकृष्णयोः॥ संस्कारमकरोत्सर्वं स्वस्तिवाचनपूर्व
कम्॥२१॥ सूक्ष्मालकावृतमुखाब्जमनोहरश्रीः शार्दूलदिव्यनखभूषितरत्नमालः॥ कांचीविराजितकटिर्वरनूपुरांघ्रि
३ गोपीमनोहरतिजानुकैश्चरन्यः॥२२॥ बद्धः कदाचिदुलूखलेन यान्यपातयतौ यमलार्जुनौ व्रजन॥ सूर्येन्दुतारो
दधिखंडसंयुतं मृत्भक्षणे लोकमदर्शयन्मुखे॥२३॥ नीलाम्बुदाभस्तडिदंबरावृतो वृंदावने यः स्वसहस्रकेलिभिः॥ वंशी
निनादैः सुखसक्तिचारयन्सरामो चति गोपबालकैः॥२४॥ वत्सेषु वत्साकृतिमागतं महादैत्यं जिघांसुं द्रुममपातयद्वने॥
कपित्थकानां चरणं प्रगृह्य तं यो लीलया गोपसुतैः सुत्रैः सुतः॥२५॥ यश्चैकदा गोपसुतैः सहाग्रजश्क्रीडन्यमुनासूर्यसुतांस्त
वत्सकान्॥ नीरंतटे पाययितुं बकासुरं प्रगृह्य चंचौ समदारयद्रिपुम्॥२६॥ वृंदावने तिरमणे भगवान्प्रभाते क्रीडन्सम
हि सखिभिः शायरूपदेत्यम्॥ गोवत्सपालगिलमाघ्नाज घानकंठे गत्वा दृशाथनिजवत्ससखीन्रराक्षत्॥२७॥ अचोर
यद्वत्सपवत्सकान्विधिर्यदा तदा गोकुलवासिनां मुदे॥ धातुस्तु मोहाय वभूव वत्सरं स्वयं यथा वत्ससखि वत्सरूपभृत्
॥२८॥ आशीविषं बहुसमैः कृतवासमर्कपुत्र्यां प्रसह्य भगवान्विमदं चकार॥ कृत्वा फणासु नटनं सुखयन्स्वकीयान्दा ३
वानलाद्व्रजमरक्षदसौ निशीथे॥२९॥ कृत्वा वेषं विचित्रं स्वललितमुरलिगायनाच्चारयन्गा न्हीं हींकारांश्च कुर्वन्स्त
रमरवनिताधैर्यमामोचयन्यः॥ दृष्ट्वा पुष्टाः सुतृप्ताः व्रजमिन दुहिंतुः शापयन्साद्वलोर्व्याः क्रीडन गोपालबालैः सु

सुखयतिसकलान्गोपगोपीजनान्स्वान् ॥३०॥ कंसेरितंगोपवपुर्धरं महोद्दैत्यंप्रलंबस्वजिघांसयागतम् ॥ छलान्महो·
द्धांसभृतारिरामकंजघानरामस्यकरेणयोऽवमम् ॥३१॥ गोपात्मजैः कामनयाफलस्ययः संप्रार्थितोरामयुतोययौत्वरम्
॥ लोकद्विषंरासभरूपधेनुकंहत्वाकरोतालवनंसुखस्थलम् ॥३२॥ गोपीनामात्महेतोर्व्रतहितबदिरात्कस्यउपःकालेकु
र्वतीनांहिकामंनिजचरणरतिंपूरयित्वाथगत्वा ॥ दीक्षाङ्गाखंस्वमित्रैर्निखिलभुवनराउन्नपाध्यापदेशात्तदारान्नंगृहीत्वा यमुनायां२
मखजनितमदंयोहरद्ब्राह्मणानाम् ॥३३॥ शक्रंगर्वधराधिरूढमनसं लोकेश्वरंवायुभिर्भुनैर्वारिधरैःक्षणाद्रूयकरैःस्थू
लास्मकोलालकम् ॥ वर्षन्तंव्रजविप्लुवायरूषितंयागध्वघोहरिः कृत्वागोद्धरणंस्वघोषसुखदोनिमानरहितंमेवाकरो
त् ॥३४॥ द्वादश्यां निशिपारणायचयमुनांस्नातुंप्रविष्टंबलाद्भृत्यःपाशभृतोनयद्व्रजपतिंबद्धांतिकेस्वामिनः ॥ तन्मोक्षाय
गतंपरेशमभयंगोपेशपुत्रंसुदादृष्ट्वाप्याशधरार्चयन्निपतिंकृष्णव्रजेशंतथा ॥३५॥ ब्रह्मेशेन्द्रजयाभिमाननगसंरूढाल
भ्रमानहाद्वृंदारण्यपुरंदरोग्र्यललनारत्नैःस्वगोपीजनैः ॥ रात्राविन्दुमरीचिनष्टतमसिस्वर्गंगनामोहयन्नेमकस्य ॥३६॥
पलाशिकाननवृतस्सूर्यात्मजायास्तटे ॥३६॥ गोपीनांरासलीलांसहमसुरमहनशंखचूडंवनेतन्मौलिस्थंरत्नमुख्यंबल
करकमलेयोर्पयत्पश्यतीनाम् ॥ कंसादिष्टंत्वरिष्टंव्रजसुखमसहंगोमरब्रह्मशृंसायंगोष्ठेजघानव्रजजनसुखदो
गोकुलेशात्मजोजः ॥३७॥ अंबावनेनन्दपदग्रसंशायंनिहत्यपादेनबलस्यपन्नयतः ॥ तस्माद्व्रजेशंतमहंमुनिश्वरशापा
दरक्षद्गवान्निशीथके ॥३८॥ गावर्द्धताद्रौन्तपचाररूपतः क्रीडारतान्गोपकुमारकान्विलेशरुंधन्हरन्व्योमममहासुरो

हतःकृष्णेनगोपाभयतोविताभरम्॥३९॥केशीतुकंसासुसमःसमागतोजिघांसयाश्वाकृतिरात्मनोव्रजे॥प्रा
४ तेहतोनन्दसुतेनतन्मुखेखेदस्वाभुजंमृन्मयवाजिवत्क्षणात्॥४०॥नीतस्ततोसौमथुरांश्वफल्कजाक्रूरे
णमित्रैर्विचरन्करेणयः॥कंसस्यभृत्यंरजकंमहाशठंजघानतस्मादहरद्वरांबरम्॥४१॥तंसौचिकंयःसमनु
ग्रहीतवान्मालाकृतंचष्टवरेणसेवकम्॥चापंबभंजात्रुमहादृढंरिपोस्तत्खंडकेनैवजघानदैत्यकान्॥४२॥
कृष्णागोपैःस्वपुर्य्यांनिखिलमणियुतस्वर्णहर्म्यान्वितायांपुंभिःस्त्रीभिःसमंतात्सुनयनचषकैःपीयमाना
मृतास्यः॥गच्छन्नानन्दमूर्तिर्नृपपथिपरिहासेनकुब्जांस्पृशन्यश्चक्रेतूर्णरमांगीसरसमलपजारूपमात्रेण
तुष्टः॥४३॥रंगद्वारिगतंमतंगजवरंहत्वातथाहस्तिपात्रंगंयान्नुपयोक्षणेनहतवान्मल्लांश्चकंसंरिपुम्॥
बंदेतातपदंविमुक्तनिगडंवृष्णीन्स्ततोवर्द्धयद्गत्वाऽवंतिपुरंसुतीरधिगतःसांदीपिनेःसांगकाः॥४४॥
शास्त्रत्मभवादिभिःसुखैरमेघातमैर्वास्मिसुधांगोविदार्णतःप्रगृह्यभवनेबर्षद्विरेवद्वितारपोत्तमा॥विद्याद्विय
यतीसमस्तपुरुषार्थप्रापकावेगतःश्रीसांदीपिनिपर्वतादवतरंतीकृष्णसिंधुंगता॥४५॥अधीत्यसर्वंगुरुद
क्षिणार्थंययाचआनम्यगुरोःपदंयः॥गुरुःस्वपुत्रंजलधौमृतंतंसंमंत्र्यपत्न्यावरयांबभूव॥४६॥प्राप्तोवारि ४
निधेस्तटंजलधिनागत्यार्चितःप्रार्थितोहत्वापंचजनासुरंजलचरंतद्देहजंकंबुकम्॥आदाययाथययौयमस्य
नगरींलेनारदात्कजितान्नीत्वाचार्यसुतंन्यवेदयदसौगुर्वर्हणार्थंप्रभुः॥४७॥आश्रुत्यजामातृवधंजरासुतः

प्राप्तस्त्रयोविंशतिवाहिनीयुतः॥ पराजितः सप्तदशाजितोऽच्युतैर्मुक्तोऽपचक्रुश्च बलेन वत्सवत्॥४८॥ म्लेच्छोऽस्त्रि
भिः कोटिभिरायतोऽपुरीं श्रुत्वाजिवीरं यवनो मृधेच्छया॥ भस्मीकृतेसौ मुचुकुंदलोचनस्थितेन कृष्णेन शिवेन काम
वत्॥४९॥ मुक्तासुवर्णेन्द्रनीलस्फटिकमरकतारक्तरत्नप्रवालवैदूर्यहर्म्यलक्षैर्नवभिरधिकृतां दर्शयामास दिव्या
म्॥ स्वःशिल्पाश्चर्यदां स्वांजलनिधिपरिखां यादवेभ्यः पुरीं पठसंरत्नैस्त्रैलोक्यनाथोऽभवतु पतिरतः प भजेतं भ
जाय॥५०॥ हित्वान्यचिन्तां दुरिताब्धिदारं मतमेव चित्ते विनिधाय चिंतय॥ गायाशु तस्यैव गुणान्मनोज्ञान्भजास्व
कायेन तमेव सत्यतिम्॥५१॥ तं भक्तवत्सलमजेशानुतं स्वभृत्यवश्यं रमेशमखिलेशमनाद्यन्तम्॥ सच्चिद्घनं नि
खिलवेदशिरोभिरीमपादं भजस्व व्रजराजसुतं हि मां भि॥५२॥ इति श्रीमद्द्राविडकान्हजीभयात्मजबालमुकुंदश
द्दविरचितश्रीरुक्मिणीमंगलाख्ये द्वितीयसर्गः॥२॥ इत्थं मुनेर्नन्दकिशोरलीलाः श्रुत्वैव पादौ प्रणनाम मूर्ध्ना॥ हृदा
ययौ कृष्णपदारविन्दं गंगेव सिंधुं परिपूर्णवेगा॥१॥ दृष्ट्वा मुनीशः श्रवदश्रुनेत्रां द्रवद्धृदं मोदसमुद्रमग्नाम्॥ आ
मंत्र्य भैष्मीं पुलकांत्यगीं ययौ विदर्भाधिपपूजितस्ततः॥२॥ ततो मुनिः कृष्णपदाब्जदर्शनोत्सकाययोद्वारवतीं म
नोहराम्॥ सर्वर्त्तुपुष्पादिसमृद्धिमद्द्रुमारूढैः खगैः हूनिमिवाचरंतीम्॥३॥ दिव्यां समुद्रपरिख्यां मणिरुक्मगेहां त्र
ल्लशेशार्कवरुणान्तकवित्तनाथैः॥ द्वारस्थितैर्बलिकरैरभिपूजितां तां वैकुंठतोऽतिरमणीं सकलर्द्धिदकाम्॥४॥ प्रोत्फु
ल्लपंकजसरसीशुककेकिभृंगहंसादिरावरुचिरां भुवनैकधन्याम्॥ निश्रेयसः क्षितिमवाप वृषैकसत्र्यं लो

लोकोत्तरां निखिलभाग्यचयैकलभ्याम्॥५॥ सो द्वारिकां कृष्णपुरीं प्रमोदादालोक्य मोदं परमामवाप्य॥ द्वारावती
ब्राह्मणकांक्षयासययौ त्वरं तद्भवनं भवापहम्॥६॥ तस्या हरेर्भवनमिन्दुसहस्रशोचिर्विप्रो विलोक्य परमां मुदमाप्य
चाग्र्य॥ तस्मिन्दरीहृदयशामतीवरम्य सिंहासनस्थमपश्यद्यदुनाथमीड्यम्॥७॥ सच्छिद्रं विधिशिवादिभिरात्मका
मे ध्येयालु पादमखिलेश्वरमात्मनाथम्॥ आनन्दमूर्तिमवलोक्य बभूव लीन आनन्दसिंधुसुनदीब सनारदो वै॥८॥ तेना
रदं द्विजवरं स विलोक्य दूरादुत्थाय यादवकुलेशः शिरसाननाम॥ संवेश्य रत्नकनकासन आदरेण संपूज्य सज्जनपतिः
शिवमाश्वपृच्छत्॥९॥ दृष्ट्वा त्वदागमनमघफलं जनेनेति ध्य त्वदंघ्रितलसेवनचः सुरर्षे। तीर्थीकृतं ममगृहं चर
णादकेन पूतेन यादवकुलं भवता पुनीतम्॥१०॥ संमोद्य तं मुनिवरं परमान्नकेन तांबूलगंधवमाल्यसुचेलकेन॥ सं
पूज्य पादयुगलं शनकैः स्पृशन्सः कृष्णो जगाद भगवन्कुत आगतोसि॥११॥ आलोक्य मां गमितुं चरतः सतांस
ध्यम्र्यं हरेर्वचनमात्मगुरोः परस्य॥ श्रुत्वाह नारदमुनिर्निजनाथदेवं प्रासोऽज कुंडिनपुरादहमत्र कृष्ण॥१२॥ दृ
ष्ट्वा विदर्भनृपतेर्दुहितां मृगाक्षीं बिंबोष्ठकुंदरदनां मृदुकंजदेहाम्॥ अंकोन्हितेंदुवदनां शुभशीलरूपौदार्यशु
भांकसुमतिं भुवनोत्तरांगीम्॥१३॥ मेने तव प्रियतमां कमलां च लोके जातां सुलक्षणसुतां खलु रुक्मिणीं वै॥
अत्रागतः कथयितुं मया विवाहं कुर्वीत्वाचेति वितरन्सुखमाप्नु ॥१४॥ न्हीवाच्छतदुतिशकुंतलिकां विकेन्द्र प
त्नीव शिष्टदयिता शतरूपका द्याः॥ प्रेक्ष्यामि मुखं मम विलोकयतः कुरूपाम्भांतिभ्रु बकि मघुनावततांचियते॥१५॥

श्रीनारदस्यवचसाकमलांविदर्भराजेन्द्रजांस्वसदृशींमवगम्यकृष्णः॥उद्वोढुमाशुहृदयंविदधेथविप्रपाणिंप्रगह्य
भगवान्समुवाचत्याभात्॥१६॥सुद्धहिष्यामिविदर्भपोपदामह्यंप्रदास्यत्यथविवर्यभीष्मजाम॥नोचेद्धरिष्यामि
बलेनपद्मजांतथ्यंकरिष्यामिसबद्धचोवरम्॥१७॥आपृच्छकृष्णंमुनिराटतदंघ्रिपद्मेसमावेश्यमनोथयोसः॥
संप्राप्यपूजांपरमेश्वरेणकृतांपशंसन्विधिलोकमाशु॥१८॥इतिश्रीद्राविडकान्हजीभट्टात्मजबालमुकुंदविर
चितेश्रीरुक्मिणीमंगलाख्येतृतीयसर्गः॥श्रुत्वामुकुंदस्यगुणानपराक्रमोदार्यक्षमाशीलदयावलादिकान॥
रूपंचचक्षुर्भ्रमरप्रियालयंमनेनुरूपंपतिमात्मनोहित॥१॥भैष्मीतदारभ्ययदृत्तमात्मयेजग्राहसाश्रीभागवतं
व्रतंहृदा॥त्यक्त्वान्यभोगान्सलिलानिचातकःस्वात्यंबुदंलब्ध्यैपवनादनंयथा॥२॥वाचाहरेर्नौमिरताभवत्स
दाकायेनसाकृष्णपदाब्जसेवने॥गृहान्तरेदृष्टुमलक्षितेस्थिताप्रियस्यनामानिरटसन्त्यहर्निशम्॥३॥प्रातःस
मुत्थायचकृष्णमानसाकृष्णार्चनंसंदधतीविधानतः॥आनन्दमग्नाहृदिकृष्णलाभतःपूजांविसस्माहरेःकृ
तांक्वचित॥४॥रताभवद्वैष्णवविष्णुशास्त्रयाःश्रीमत्तुलस्यांहरिपादसेवने॥गंगेनकन्यादिनदीपुवैष्णव
व्रतेष्वसाकृष्णपत्नीरूपासती॥५॥विद्धध्वनंचन्दमृगेंद्रनीलशीलाकुञ्जगानवलोक्यदूरात॥संपूजयामास
सदष्टदेहापांगोपमेयान्कबिभिर्हिभैष्मी॥६॥प्रसन्नचित्ताविचरत्यहर्निशंश्रीकृष्णपादार्चनकर्मणिद्रुत्तम॥
निधायकृष्णंहृदिकृष्णवाससासासंवृताकृष्णकवावृताननाः॥७॥सुकृष्णशंखासितरत्नभूषणमनोज्ञकृ

ष्णास्तरणासितेक्षणा॥ कृष्णान्पदार्थान्नुरागसंयुता बिलोकयामास निजेश्वरेहया॥८॥ कृष्णेशनाथेतिरटंस्य
हनिद्रं भैष्मी यथा चातक इष्टवारिदम्॥ सर्वेन्द्रियैः कृष्णपदाब्जसेवनादात्मार्पणं कृष्णधवाय साकरोत्॥९॥
कुमारिकां तामवलोक्य मातरो भ्राता पिता न्ये च सुहृत्पुरोधसः॥ बिवाहयोग्यां नरलोकदुर्लभां धिन्ताकुलास्ते
कृपयाप्नवनहृदि॥१०॥ कोटिनभां कोटिविधूल्लसन्मुखीं वरांगकान्त्या कमलात्रयप्रदाम्॥ सुखाब्धिरूपां रतिको
टिमोहिनीं गुणनशीलेन ह्रियात्मनः समाम्॥११॥ वैदर्भमुख्यान्नृपतीन्द्रनन्दनं स ह्यत्र रूपप्रतिपद्गुणाकरम्॥ संचि
न्तयामासुरलं समत्येतत्तुल्याय दातुं न नु रुक्मिणीं सुताम्॥१२॥ बिस्मृत्य सर्वं खलु नारदोदितं कृष्णः पतिस्तेस्तु
सुतवचो ह्यतिभ्रविचारयंतोपि नृपात्मजं तदा प्रापुर्न भैष्म्या गुणरूपतः समम्॥१३॥ अस्यासमानं क्षितिपात्मजं
क्षितौ न क्षाम तस्मात्तु वरं स्वयंवरे॥ प्राप्नोतु कन्येति विचार्य मानसे कुर्युस्तदानीं नगरे स्वयंवरम्॥१५॥ कृष्णं
पतिं मतनयासि भ्रष्यति स्वयंवरे द्वारवतीश्वरं नृपान्॥ बिहाय स्वष्टेति विचार्य भीष्मकोराजापि मनेहितमात्मना
सदा॥ श्रुत्वा ययुर्भूपतयः स्वयंवरं भैष्मीहया कामरुजाकुलाशयम्॥ चैद्यः सशाल्यः सबिदूरथो जरासंध
कुजपौंडकदंतवक्रकौ॥१६॥ यन्येन्नृपास्तत्र समाययुर्मुदा समर्थवाहध्वजनीसुतास्तथा॥ देवासुरा यक्षविद्या
चरादयो गंधर्वकिंपुरुषकिंनूरादयः॥१७॥ नानागतान्नृपसुरासुरादिकान्रुक्मि सम्भ्यत्य सहोदरान्वितः॥ स
मर्चयामास जलौघसांवररत्नादि भिर्मित्रधिया खिलान्वलो॥१८॥ तत्रा ययौ श्रीवसुदेवनन्दनः सनीरनीलां

वुस्चारुविग्रहः॥सौदामिनीवरुचयुगेंबुजेक्षणो विराजमानो गरुडध्वजे रथे॥१९॥सूर्यैतपत्रविधुचामरभूषितं तं
गखस्थैः सुरैः कुसुमवर्षिभिरीड्यमानम्॥सद्रत्नरुक्ममुकुटं रुषकुंडलाढ्यमारक्तलेगलमंगदमुद्रिकाढ्यम्॥२०॥
मंजीरकंकणधरं शुभरत्नमालं नीलारुकाद्वतमुखाब्जमुदारनाशम्॥श्रोलालयं मणिस्रजं वनमालयाढ्यं सै
न्यैर्युतं यदुपतिं त्वभिवीक्ष्य रुक्मी॥२१॥सेवाश्चिरत्वमसहन्नहि कच्छसन्यसेरक्तलोचनडमेत्रा विधीश्वरस्य न
ग्रहणस्यपरिभावभलं चकार वेदीशात्र॥स्वमगधेशमतेस्थितो वै॥२२॥भाम्यच्युतो निखिलपापवशाः परेशांस
च्छित्सुखात्स्यमजिनेषशिवादिवंद्यम्॥कृष्णं विहाय दितिजानभजत्स रुक्मी प्रेम्णा पुरीषमिव दक्षकरः कौधराया
म्॥२३॥ज्ञात्वा विकमतिदिदं शिशुपालशाल्ववार्हद्रथाघसुरक्षयगतासुरस्य॥भीष्मात्मजस्य यदुनाथरिपोर्महेन्द्रः
कोपान्वितश्च वरं वरं समचोदयत्तम्॥२४॥कृष्णाय बलेन करमाहसमेत्य शक्रदूतः समर्चय परेशमजेशदेवम्॥कृ
ष्णाय दूतम महानहि चेदिदानीं दंश्चसि ममरपते रितिचैहि रुक्मिन्॥२५॥श्रुत्वा महेन्द्रवचनं पितरं समेत्य रुक्मीज
गाद रभसात्वमिहागतं तम्॥कृष्णं समर्चय न मेस्ति विभ्रमस्य शाहुं क्षमानटवरस्य कुलाधमस्य॥२६॥श्रुत्वैव भीष्म
कनृपो निजनाथदेवं कृष्णाय दूतमयुतं स्वगृहागतं वै॥शीघ्रं समेत्य पदयोः प्रणनाम मूर्ध्नि निंदाकुलो न हि समी
क्षितु मीशआसीत्॥२७॥उत्थाय धैर्यमवलंब्य परात्परं तमानन्दमूर्तिमवलोक्य मुदार्चयत्सः॥सद्रुधमाल्यम
णिरुक्मविभूषणाद्यैः संमंत्र्य रु प्रीतिविदर्भजाध्रवम्॥कृष्णं पतिं स्वं वरयिष्यति क्षितिश्वरान्स्तरस्कृत्य वि

८

मगहिलात्मना ॥२९॥ तस्मादिदानींनृहियोग्यस्वयंवर तिष्ठति यादवेन्द्रे ॥ उपारमयां तु विदर्भपुत्र्या विवाहवोचितइष्ट
मृभूता ॥३०॥ कृष्णोपिया मन्दमतिः स्वयंवरं दूरीचकारात्मरिपुर्बलेन वै ॥ स्वसुस्तिरस्कृत्य हरिप्रियान्जनान्रुक्मीय
थोपापवन्नाठसमुत्थितम् ॥३०॥ तद्रुक्मिणी दुरितगस्य विलोक्य कर्मकस्यद्विषोद्विजगणा पितरौ तमान्ये ॥ खेदंय
युः परममिष्ट वियोगदुःखादन्नातुराइव महाविकलासचः सुः ॥३१॥ कृष्णस्ततो यदुपुरीसमगाद्वितर्भदेशस्यचित्त
नयनानिहरन्स्वमूर्त्या ॥ इंद्रादिभिर्देववरैः समीडितः क्षितौनृभिर्यादववाहिनीयुतः ॥३२॥ ततस्तु सर्वक्षितिपाः
स्वकंस्वकंपरंययुः खंडितमानसाश्च केः ॥ खकैरनीकैः कथयन्त आदराद्भीष्मात्मजारूपसभिर्द्विवरैः समीडितः ॥
क्षितौनृभिर्यादववाहिनीयुतः ॥ इतिस्तुश्रीमद्राविडकान्हजीभट्टात्मजबालमुकुंदभटविरचितरुक्मिणीमंगलाख्य
काव्ये चतुर्थः सर्गः ॥४॥ अथैकदा भीष्मनृपः सहोदरैः पुरोधसामात्यगणैर्युतो गृहे ॥ विचारणमसुतां मनोहरांकस्मैददामि
तिनतातमोत्तमांगकष्ट ॥१॥ राज्ञीतदा राजवरं सुताया विवाहचिन्ताविकलं जगाद ॥ स्मृताचदेवर्षिवचः सदर्षा सा हर्ष
यन्तीवचनामृतेन ॥२॥ पुत्र्याः समानस्य वरस्य चिंता किमर्थमेषा क्रियते भवद्भिः ॥ श्रीद्वारिकायां वसुदेवपुत्रो वरो
स्ति तुल्ये समुनिना पुरोक्तः ॥३॥ रूपोत्तरो बुद्धिगुणैरुदारः ष्टकुलोत्तरः पुण्ययशाः शरण्यः ॥ कान्त्येन्दुतुल्यष्टस्मरमोह
नांगोवलाश्रयो मद्दुहितुः समानः ॥४॥ तस्मै यदोर्वंशविभूषणाय सभवद्भिरेषा तनया प्रदेया ॥ कृष्णा प्रिया कृष्णसमान
रूपा कुलस्य वध्यै निजमंगलाय ॥५॥ केनापि भाग्येन ममोदरे जनिः कृतानया वारिनिधौ श्रियेव हि ॥ भैष्म्यावयं जन्म
फलं गताश्च नष्टकुलं सुपूतं पितरः समुद्धृताः ॥६॥ तस्मात्सुतेयं वसुदेवनन्दनयोग्यायतः कृष्णरतारमापरा ॥ दे ८

वर्षिणोक्तः।सचकोपशाकरभ्रस्तादिपूज्यश्चपरमेश्वरःपदः॥७॥श्रुत्वेतिराज्ञावचनंविदर्भीयोराजातथान्येचवसु
हृत्पुरोधसः॥प्रहर्षिताःस्मक्षितिवाक्यमूचिरेमेघध्वनिंवर्हिसमूहवत्तदा॥८॥भीष्मःप्रमोदात्ससुवाचमंत्रिणंवेशा
स्वस्युक्तोस्तिगुरादिनेवसो॥वैवाहिकंलग्नमतीवसुंदरंदास्यामितस्मिन्तनयांहिविष्णवे॥९॥अद्यैववैवाहिकस
त्फलादिकमादायमच्छन्तपुरोहितामम॥द्वारावतींतेवरयन्तुरुक्मिणीपाणिग्रहार्थंवसुदेवनन्दनम्॥१०॥इत्थंव
दित्वाद्भुतरत्नमाल्यांसुकान्तिहस्त्यश्वरथानिराजा॥आनीयतेभ्यःप्रददौद्विजानांहस्तेलिखित्वाविनियस्यपत्रम्॥
॥११॥दृष्ट्वापुरोधाःसुहृदःवरानिचरत्नानिरत्नाभरणादिकानि॥कृष्णायदातुंनृपसत्तमेनदत्तानिप्रीत्याजगदुर्न्दपंते
॥विदर्भराजेंद्रदुहितृवत्सलत्वय्यद्भुतंनैचवरायचैतत्॥दानंयतस्त्वंनिखिलासुभूत्सुमहेन्द्रवद्भूपतिकामितं
प्रभो॥१२॥अथागतस्तत्रकुलस्यदूषणोरुक्मीहरिद्विट्दितिजाधमोवली॥पप्रच्छतातंकिमिदंधनादिकमानीय
वानीयभीष्मापितः॥१३॥दृष्ट्वेवभीष्मोविकलेंद्रियःसुतंजगादसौरस्तनयायरुक्मिणीकृष्णायतुंमणिसत्फला
दिकंसंप्रेष्यतेद्वारवतींद्विजैर्मया॥१४॥तत्साधुवादश्रवणेनदग्धमुखोयथार्कद्रुमईष्टवृष्ट्या॥रुक्मिवली
कृष्णरिपुस्तदाहकृष्णस्यकोपात्परिभाषणंवै॥पुरैवकृष्णोरसिलब्धमानांतांरुक्मिणींकृष्णरतांविजानन्॥वै
द्यायदातुंसुहृदेतिमूर्खेहियसुधावत्सजगादरुक्मीश्वसामदीयापसुपालकस्यभ्रमदियेतस्यकुलाधमस्य॥
वैदर्भराजेंद्रसुतानयोग्यायथाज्ञमैंद्रअन्नकस्यतात॥१५॥योचारयद्गोकुलवासिनांगृहेहरेहघृतंदुग्धदधीनि

गोकुले॥वद्धापिरुद्धापिजनैर्न्नतज्जहौकथंसराजेन्द्रसुतांसमर्हति॥१७॥योचारयद्व्रजवासिनांसुतैर्वनेवनेगो
रिकचित्रितस्तनुः॥शिखंडगुंजावनपुष्पभूषितःकथंसराजेन्द्रसुतांसमर्हति॥१८॥तत्कादिकेनैवचभारदेहंगोपि
८ भिर्व्रतनगृहेगृहेयः॥ममेन्द्रतुल्यस्यसहोदराकथंकृष्णस्ययोग्यावृषलस्यवेदवत्॥१९॥कृष्णःपरब्रह्मपरेशआ
त्मनामात्मेतिवेद्यश्चनगोचरोनसः॥अष्टांगयोगेहृदिसेव्यएववैव्योमवत्सर्वत्रसमन्वितोविभुः॥२०॥नब्रह्मणोजा
तिकुलंनभार्यानमित्रशत्रूनचजन्ममृत्यू॥नबांधवानैवपितानमातातस्मान्नभावागतिकृष्णआत्मा॥२१॥कृष्णः
परेशःक्षितिभारनुत्तयेजातोविधेःप्रार्थनयायदोःकुले॥इत्युच्यतेतर्हितिदेवसच्चिदेवयंभवद्भिर्नहिदेवकीसुतः
॥२२॥भोक्ताचभोग्यंचफलंचसर्वंव्याप्यंतथाव्यापकरूपमत्र॥ब्रह्मैकमेवाद्वयमस्तिसच्चिदानन्दरूपाखिलवेदगीतः॥
२३॥निरंजनोनिर्गुणनिर्विकारोनिराश्रयःस्वाश्रयरूपहीनः॥युक्त्यैवगीतोखिलवेदवाण्यात्याहयतोऽप्राप्यनिवर्त्तत
वेद॥२४॥अघोघरद्धामयपिंडभूतंगोवर्द्धनंतेनकिमत्रदृष्टः॥किंवाजघानस्त्रियमात्ममातृरूपांबकीनत्समसौबकंवा
॥२५॥किंवाजघानेषवनेशयुवाखरंप्रलंबंवृषभंतुरंगम्॥तस्मात्किमीशोरजकस्यघातात्प्राप्तोनचापस्याविभं
जनाद्वा॥२६॥पलायितोवाजिमुखजरासुतात्तेनायमीशःकिमुमातुलस्य॥घाताद्धजेवाभिकनृत्यगानाद्वक्तव्य ८
इशःकथमात्मशत्रुः॥२७॥द्विनद्वियादासमद्भुयोन्नृपासनंगतराजकुलानयादवाः॥नयादयेतानवनाकुलेन
तत्तुल्याकथंवादाशयोग्यतांगताः॥२८॥ययातिनाशस्तकुलस्यभूमिर्येर्वहिष्कृतस्याद्यमकर्मणाठसरा॥नट

मिथ्यानिरतस्यकाननचरस्ययोग्येयमहोकथंस्वसा॥२९॥सुवर्णवैदूर्यकवज्रभित्तिका।सुवर्णसौधोदरेशमध्यगापु
री॥यस्यास्तिहर्म्यैर्नचरुक्षकैसंयुतासुवर्णनारीपुरुषैःसुसंकुला॥३०॥अरत्नेशशाक्रान्तकपाशश्मद्धताध्यक्षादिभिः
सुवितत्वत्वरासभा॥कल्यांध्रिपापस्यवशेचयादवाःसपांडवाःविप्रसुरोत्तमाखिलः॥३१॥शामेककर्णहरवाध्विजा
गजाःरथोत्तमाःकुन्दमुकुन्दनीलकाः॥शंखोमहापद्मकपद्मकच्छयाःसर्वतिसावैमकरोत्तमानव॥एतेमहाशेवध
याष्टसिद्धयोणिमामहिबलंगिमागरीयसी॥प्राप्तिस्त्वमीशित्ववशित्वकमितायस्यास्तिकिंतेनभवेक्षितीस्वता
॥सप्राप्यसपत्निभिर्भामधर्मविमोहितोयादवसैन्यसंयुतः॥राजत्वहीनोखिलमित्रघातकःकृष्णोनयोग्योदु
हितुर्नृपस्यते॥३४॥क्ववासुदेवठक्कबिदर्भयात्मजाविदर्भगोत्रंक्वयदोःकुलंक्वच॥तवेशितत्वंक्वचकृष्णराजतापि
तरेवयदंसकलंविचार्यताम्॥३५॥तस्मान्नृपोयंशिशुपालनामाप्रख्यातकर्मादमघोषपुत्रः॥शक्रादिलो
केश्वरजिद्बलाढ्योयोग्येठवरोमेस्वशुरात्मतुल्यः॥३६॥शक्रादयोयस्यरितापितायगुःकृष्णंस्वनाथसश्चभा
गधोज्झितः॥भेजेसमुद्रावरणांपुरीभयात्सयादवोरामयुतोपलायितः॥३७॥समागधोन्येचमहीश्वराःच
शयस्यातस्मैशिशुपालभूभृते॥दास्यामिहंस्वांभगिनींबलेनवैवृद्धःपिताभून्नहिर्वित्ययंत्विदम्॥३८॥मू
ढस्सरूक्मीहवतस्वामीहांभद्रास्वपित्राःसुहृदांव्यथांपराम्॥दत्वास्तिरस्कृत्यरुषांधलोचनोलिले
खपत्रंकरपीडनस्यवै॥३९॥बिवाहलग्नंस्वयमृज्जसुकुपक्षेकवौविष्णदिनेर्द्धरात्र॥स्वशुर्लिखित्वापरि

रा।।ध्यमित्रेश्चैद्याय सं प्रेषयतिस्म चारः।।४०।।तद्दृष्ट्वा दोषानविचार्य चाग्रहो चैद्यो हितान्भ्रातृगणस्य दुःखदान्
।।पित्रोर्हितान्बंधुगणस्य रुक्मिणीसुखप्रदो ह्यैवगुणान्विचार्य सः।।४१।।रथाश्च हस्तीन सिचर्मभूषणोत्तमान्व
था श्रीफलकुंकुमाक्षतम्।।सुवर्णमुद्रायुतलक्षमंत्रुकोत्तमानितस्मै फलदानकर्मणि।।४२।।आरूह्य वाहं स्व
लंघनादिकमादाय भो मागधसूतवंदिनः।।गत्वा त्वरं चेदिपुरं सुखं बहुदृष्ट्वावरर्थं शिशुपालमादरात्।।४३।।पत्रं प्रदत्वा
लिखितं भयेन समर्थ वाह ध्वजती भिरत्र।।आगम्य तां चेति वचो वदित्वा तत्सत्रमादाय समेहि शीघ्रम्।।४४।।कृष्णे
न सिद्धं स्वश्च सर्वि विवाहमपास्य कृत्वा दमघोषराजेन।।धनं ददौ पाचकवृंदकेभ्यो हर्षाच्च देयं स्वजनाय रुक्मी।।४५।।
धनं गृहीत्वा वददासुराद्विजोष्टमीदिने तैलमभीष्टदं वदु।।भैष्म्याः कुरु त्वं कुलदेवतार्चनं समं ऽपाच्छादनपूर्वकं नृ
प।।४६।।इति श्री द्राविडकान्हजीभट्टात्मजबालमुकुंदभट्टविरचिते रुक्मिणीमंगलाख्ये काव्ये पंचमसर्गः।।५।।
पुरे च कृष्णो रसि लब्धमानां तां रुक्मिणीं कृष्णरतां विजानत।।चैद्याय दातुं सुहृदस्तृणाय की लांकुरानो रिव बा ८
लिद्रात्।।१।।कुपथ्यमिष्टं ज्वरिणेंतकाय दातुः सुधागदपदामथाप्यात् भैष्म्याः समीहाप्रतिपादनस्य वेदभी
सुतस्यवेभवमे।।वदत्र यीमिव जघन्यजजन्मने लोभात्सुधां विषधराय यथाविमूढः।।२।।रे द्रुह विहिभिषकाय
था नु जां रत्नां वै चैद्याय दातुमभवद्रभसास्थिरः सः।।३।।ज्ञात्वा भ्रातुरनीतिमात्मनयनचैद्याय दुःखार्णवे मग्नासा
हृदयज्वरसनतः शुष्कास्य पद्मास्तुदक।।कृष्णस्ते स्तु पतिः सुतद्यतिसुनेः सिक्तामृता तत्तयातदाप्राणत्यागम

भीप्सतीन हि समर्था भूद्धरिं ध्यायती ॥ ३ ॥ रुक्मिण्या हृदये भवत्सुमहती चिन्ता कथं श्रीपतिर्दुःखाब्धिं प्रलय
न्मनोनयनयोरानन्दमुल्लासयन् ॥ आत्मद्विषि मुखश्रियं रविरिवध्वांतं हरन्मे हरिर्गृह्णीयत्करमाशु यादवपतिः
कृष्णो दयावारिधिः ॥ ४ ॥ श्रीगोपीजनवल्लभाच्युत हरे दीनैकबंधो प्रभो पूर्णानन्द दयाकरानलसहे मां विद्धि चेटीं नि
जाम् ॥ नाहं चैद्यगृहे कदापि सहजैर्दत्ता गमिष्यामि नो भक्ता कुक्षिमथो मयि व्रजपते भुक्त्वा विषं दुर्द्धरम् ॥ ५ ॥ जन
तारण मुदा देव कृष्ण भक्तैकबंधो निजजनसुखदायिन्दुःखहारिन्मुकुंद परमदुरितमग्नां रक्ष रक्षाघमोत्वं निजचरण
पद्मं दर्शयित्वा कृपालो ॥ ६ ॥ वृकावृत्तेणीव भयाकुलासती शुशोच सेत्थं हरिदर्शनेच्छया ॥ कंसं प्रेषयिष्या
मि कथं प्रियाय वै वृत्तं समस्तं हरये बतात्मनः ॥ प्रेषयद्द्वारवतीश्वरं प्रतिवृत्तं समस्तं स कथं लभेन्मम ॥ ७ ॥ पश्य
न्दूतं कमपीष्टदं द्रुतं गत्वाद्य यो द्वारवतीश्वरं प्रती ॥ उक्त्वाखिलं वृत्तमिहानयेत्पतिं ममेति शोचन्त्यथ सुप्तिमा
प सा ॥ ८ ॥ स्वप्ने ददर्शाथ सवत्सका गाःग गर्गादिकान्विप्रवरान्सुरद्रुमान् ॥ इन्द्रादिदेवान्परमानुकूलान्दु
र्गां शिवं गजाननं षडाननम् ॥ ९ ॥ प्रणम्य तानर्चदादरेण सा कृष्णां प्रिये प्रेक्षणकाम्यया मरान् ॥ वरं ददुस्ते
स्तु पतिर्विदर्भजे कृष्णोऽखिलेशोऽधिति मोदमाप सा ॥ १० ॥ संपूज्य गर्गादिमुनीन्धनादिभिः सप्रच्छ कृष्णं पति
मात्मनः प्रियम् ॥ श्रुत्वार्थयन्ते जगदुर्हरिः स्पृशति त्वां वासुदेवो गिरिजागृहे द्रुतम् ॥ ११ ॥ तदैव निद्रान्तमव
प्य भिष्मजा किंचित्प्रसन्नाथ सिहृष्टमाहमन्तः ॥ स्वप्नं निजालिं प्रति रुक्मिणी च सा श्रुत्वा सखी मोदकरं जगाद

ताम् ॥२२॥ आकाशवागन्वाप्य तवभिशाते चिंता न कार्या च कथंचिदङ्गे ॥ भ्रातुर्दृगदुष्टदमं विधाय हि
१० रिष्यति त्वां हरिरेव भैष्मि ॥२३॥ श्रुत्वा तदाकाशवचो रहस्थिता प्रसन्नचित्ता समभूद्विदर्भजा ॥ यथामृतं प्रा
प्य मुमुर्षुराकुलो जरात्ययध्वंसनमिंद्रियप्रियम् ॥२४॥ ततो जगौ कृष्णपदाब्जदर्शनोत्सुका स्ववरप्रेमलग्नहि
रुक्मिणी ॥ कृष्णं दयासिंधुमसुप्रदं प्रियं पतिं स्मरंती हृदि गद्गदस्वरा ॥२५॥ अलकाचलीलब्धतन्वारुकंजमुखं सु
नीरदसुंदरं तडितांवरं जलजाक्षमंबुजनाभमब्जकरांघ्रिकम् ॥ अरुणाधरोष्ठमुदारनाशमनर्घ्यकर्णकचं ह
रिं पुरुषार्थसिंधुमहं कदाप्यवलोकयेय करुणानिधिम् ॥२६॥ अवित: कबाधुसुतो दितिस्तनयान्नसिंहवपु
धृता प्रलयाब्धसत्यव्रतो द्रुतं झषरूपिणा ॥ कनकाचल (मथनेधृत: कमठेन इद्धकररूपिणा कनकाचल:) म
थनेधृत: कमठेन वराहकरमूर्तिना ॥ क्षितिरुधृता जनकात्मजा दशवक्त्रत: रघुनाथरूपधरेण वै ॥२७॥ नरकार्ति
कामुकमप्यपास्य पिता भृगूद्वहरूपिणा वटुवामनाकृतिनाविता सुरसंगता बलिरात्मना ॥ हलधारिणा व
सुधाविता नृपवेषदैत्यविनाशना त्रिदिवाविता जिनरूपिणा दमित: कलि: कलरूपिणा ॥२८॥ द्रुपदात्मजा
कुरुतो विताहरिरूपिणा झषता करि ॥ व्रजबालिकामणिबूडता व्रजबालकाभयपुत्रत: ॥ पितरा च कंसरि १०
पार्महा भयता विता रिपवा रुता: स हि दीनबंधुरजेन्द्रावंदितया दिहावतु मां प्रभु: ॥ २९ ॥ विधिरूपिणा सक
लं जगत्सृजतीदमात्मनि चात्मना शिवरूपिणा हरति स्वयं जलशायिरूपधरावति ॥ त्रिगुणां मृगीं परि

नर्तयन्सततं मयाविहरत्यलंसहिवासुदेवउभेशपूजितपादिहावतुमांहरिः॥२०॥वसुदेवनन्दनेदीहदर्शनमच्यु
ताघहरप्रभोवनिताहमात्मसहोदरणकरीवनक्रवैरणवे॥पतितास्मिदुःखजलांबुधोनिजदासिकेतिविचार्य
मांसहसोद्धराश्वकरणगोकुलनाथदीनदयानिधे॥२१॥निजभक्तवत्सलयादवेन्द्रशरण्यपालदयानिधेभगव
न्त्रिलोकमनोहराखिलनाथदैत्यनिसूदन॥परमप्रमोदसमुद्रकृष्णहृषीकनाथपरात्परनिजदासिकांभवमां
मुकुंदमहाघसिंधुनिमज्जतीम्॥२३॥इतिकृष्णपादसरोजमात्महृदावलंव्यजगौपदाहृदयागतात्मपतेर्हरेःपरि
रंभणप्रमदप्लुता॥स्तमभ्र्तदासवलितास्वरपुलकैर्युतासिस्तवज्ञलानिधिमाप्यनिर्धनद्विदर्भसुतातदासु
खिताधिकम्॥२४॥तत्रैवकश्चिद्द्विजवर्यमागतंविलोक्यसोत्थायननामम्मौलिना॥अपावृतद्वारमिवेष्टकर्म
णःसिद्धेस्तमानर्चरहःस्थितासती॥२५॥तुष्टावविप्रंविनतास्थिताग्रतःसदासनस्थंज्वलनंयथेद्दिदम्॥त्वमद्य
रुःकृष्णपदाब्जदोजगद्वंधुर्विधातेवसमीतुतोखिलैः॥२६॥वंदन्तिलोकाभुवनेश्वराःसदापतिष्टतेयांश्चशिवा
जविष्णवः॥विप्रोत्तमात्वखहृदाभवद्विधाःन्नमाम्यहंप्रेष्टसमीहयानिशम्॥२७॥कृपालनाविश्वसृजाद्विजोत्तम
त्वंदर्शितोनाविकवन्न्ययार्णवे॥ममकृतायाःकथमन्यथाभवत्वदर्शनंदुःखहरंसुखप्रदम्॥२८॥स्तुतोद्विजोग्रा
विकलाभिरीक्ष्यभैष्मीमुवाचेदमहोस्यसस्नेस्ते॥कस्मादव्यथास्तीत्यखिलंमदग्रेत्वंब्रूहिदंत्वांसुखितांकरोमि
॥२९॥श्रुत्वेतिवाक्यंशिरसाप्रणम्यतंभैष्मीप्रभाषाचसहोदरैःकृतम्॥खेदस्यहेतुंनिजनाथसेनेनद्यातविरुद्धं

ष्यमनोविदारकम् ।।३०।। सोत्का किरुंधतंमशेष मात्मनः कृष्णात्तबुद्धिंप्रणिपत्य मौलिना ।। अमासहासाश्रुमु
खीहृदातुरात्यक्तेनविप्रमुवाचसांजलिः ।।३१।। विज्ञासिमेकांश्रृणुविप्रतेपदंनमाम्यहंद्वारवतींव्रजाशुदम्
११ ।। वृत्तंमदीयंवसुदेवनन्दनश्रोत्रेवदित्वासमयेत्तमानय ।।३२।। दास्यामितेहंबहुदक्षिणांप्रभो कृष्णेनमद्योगमि
हायकारय ।। दुःखार्णवाद्दुद्धरमांबलानुजंपारंप्रदश्यैचस्ततेसुखप्रदम् ।।३३।। श्रुत्वैवंमांदीनदयालुरीश्वरःस
मेत्वयागत्वपितुःपुरंमम ।। हस्तंगृहीत्वास्वपुरंनयिष्यतिबलेनदुष्टपुदमंविधायसः ।।३४।। आश्रुत्यभैष्माः
वचनंद्विजोत्तमःसंप्राप्यहर्षंसमुवाचरुक्मिणीम् ।। पत्रंलिखित्वाशुकरेममार्पयपास्याम्यहंद्वारवतींसमीरवत्
।।३५।। त्वंमेस्वसाहंतववैसहोदराधर्मस्यतस्मादहमानयेतव ।। पतिंविवाहावसरेस्वसस्त्वयाचिन्तानकार्याशुप
थंकरामिते ।।३६।। ततस्तुभैष्मीद्विजवर्यवाक्यतोविश्वासमागत्यलिलेखपत्रिकाम् ।। स्वस्वामिनोद्धारव
तीश्वरस्यहृत्संकर्षणंज्ञत्यिवातिदाहतः ।।३७।। पत्रंसमालिख्यदृगाश्रुसिक्तंसंमेल्यनामांकितमाविधाय ।। भै ११
ष्मीददौविप्रकरेथवाचमुवाचतंगद्गदवाजलाक्षी ।।३८।। विवाहघस्त्रान्तमहंतुहारमालोकयिष्याम्ययनं
द्विजेन्द्र ।। तस्मिन्नद्रक्ष्येयपदिकृष्णमीशंसमुत्सृजिष्यामितदैवचासून ।।३९।। तथ्येतिकृत्वालवरःस्वचालसा
वध्वाकटिंवृद्धतरापिमूर्द्धनि ।। निधायपत्रींहृदिकृष्णमीश्वरंयुवोत्तमोभूद्बलवीर्यवत्तमः ।।४०।। कुर्वन्तियत्कृ
ष्णजनस्यकामितंभवन्तितेसर्वसमृद्धिभूमयः ।। कृष्णप्रियाणांकिमुतस्यकिंपुनःकुर्वीत्रयंनाकतनुश्चि

त्तवृत्तिभिः॥४१॥यस्याभिधानंत्र्यक्षरवित्तकामनिश्रेयसामास्वदमाहुर्वेदाः॥संसारदुःखघ्नमजेशसेव्यभ
क्तिप्रदंपापहरंजनानाम॥४२॥तस्यप्रियायाःप्रियमिच्छुरादरात्ततोजगामाशुनमस्कृतस्तस्याः॥ददास्म
रन्कृष्णपदारविंदकंसर्वार्थवृंदंपरमप्रमोदतः॥४३॥समीरवेगोतिवशीद्विजोत्तमोद्राग्द्वारिकामार्गमिसो
गृहीतवान्॥यदातदादेववरैःसमर्चितावभूवमोत्स्यैर्नमसादिविस्थितैः॥४४॥मार्गेसिवत्सांकपिलांद्विजो
समान्सीमंतिनीःपुत्रसुताःदधीनिच॥सवारिकुंभानशिवमंबिकांगणाधिपंसमीक्षन्सकुनंप्रमोदतः॥
इतिश्रीमद्द्राविडकान्हजीभट्टात्मजबालमुकुंदभट्टविरचितेरुक्मिणीमंगलाख्येकाव्येषष्टःसर्गः॥६॥तांद्वा
रिकांद्रागगमद्द्विजाग्रःसमुद्रखातांमणिहेमसालाम्॥शोभालयांपद्मनिभांभृजशशाषादिशृंगैरभितःस्तु
तासः॥१॥यदूत्तमस्थितगरूत्मिकेतनाभजायितींकृष्णरविप्रकाशिताम्॥विमुक्तकिंजल्कवशीकृतेशब्रह्मा
दियोगींद्रमधुव्रतैर्व्रताम्॥२॥प्रोत्फुल्लसौगंधिकहल्लकेन्दीवरोत्पलाज्जावृतजीवनाभिः॥तरंगिनीभिर्म
णिवालुकाभिर्हंसालिचक्राह्वरवाभिराध्याम्॥३॥वापीभिरच्छामृतजीवनाभिःप्रवालकूलैःसमलंकृ
ताभिःपद्मैःसुरक्तैसुसितासितैर्येःसोपानकैःस्वर्णहरिन्मणिनाम्॥४॥हर्म्यैःसुवर्णकलशैर्मणिभित्तिभिश्च
ज्वालासमाभिरभितारुचिरांसमृध्वा॥पूर्णारिश्याम्यकीरिसंकुलराजमार्गैतांद्वारिकांनिखिलभाग्यचयैक
लभ्याम्॥५॥नित्यासवांकनकदंडवरध्वजाभिःसेवारितातपस्ततिभुवनोत्तरांवे॥दिव्यावलापुरुपरस्त

